दशरात्रसाध्ययज्ञविशेषः। यथा, तैत्तिरीयसंहितायाम्। ७।२।५।२।
"त्रिककुद्वा एष यज्ञो यद्दशरात्रः ककुत्पञ्चदशः ककुदेकविंशः ककुत्त्रयस्त्रिंशो य एवं विद्वान् दशरात्रेण यजते त्रिककुदेव समानानां भवति ॥")

त्रिकटः, पुं, (त्रीन् वातपित्तश्लेष्मदोषान् कटति नाशयतीति। कट+अच्।) गोक्षुरकः। इति शब्दरत्नावली ॥

त्रिकटु, क्ली, (त्रयाणां कटूनां शुण्ठीमरीचपिप्पलीनां समाहारः।) मिश्रितशुण्ठीमरीचपिप्पल्यः। तत्पर्य्यायः। त्र्यूषणम् २ व्योषम् ३। इत्यमरः। २।१०।१११ ॥ कटुत्रयम् ४ कटुत्रिकम् ५। अस्य गुणाः। दीपनत्वम्। श्वासकासत्वगामयगुल्ममेहकफस्थौल्यमेदःश्लीपदपीनसनाशित्वञ्च। इति राजनिर्घण्टः ॥ तन्नामगुणाः।
"विश्वोपकुल्या मरिचं त्रयं त्रिकटु कथ्यते।
कटुत्रयन्तु त्रिकटु त्र्यूषणं व्योषमुच्यते ॥
त्र्यूषणं दीपनं हन्ति श्वासकासत्वगामयान्।
गुल्ममेहकफस्थौल्यमेदःश्लीपदपीनसान् ॥"
इति भावप्रकाशः ॥

त्रिकण्टं, क्ली, (त्रयाणां कण्टानां हस्त्यग्निदमनीदुस्पर्शारूपाणां समाहारः।) मिलितहस्त्यग्निदमनीदुस्पर्शात्रयरूपम्। तत्पर्य्यायः। कण्टकारीत्रयम् २ कण्टकत्रयम् ३। इति राजनिर्घण्टः ॥

त्रिकण्टः, पुं, (त्रीणि कण्टानि कण्टकानि यस्य।) गोक्षुरकः। इति शब्दरत्नावली ॥ पत्रगुप्तवृक्षः। इति शब्दचन्द्रिका ॥ तेकाँटाषिज इति भाषा। मत्स्यभेदः। टेङ्गरा इति भाषा। अस्य गुणाः। पित्तकफनाशित्वम्। रूक्षत्वम्। अग्निदीपनत्वम्। लघुत्वञ्च। इति राजवल्लभः ॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ॥
"त्रिकण्टः स्थलशृङ्गाटो गोकण्टोऽथ त्रिकण्टकः।
त्रिपुटः कण्टकफलः श्वदंष्ट्रा गोक्षुरः क्षुरः ॥")

त्रिकण्टकः, पुं, (त्रीणि कण्टकानि यस्य।) लघुगर्गमत्स्यः। इति त्रिकाण्डशेषः ॥ गोक्षुरकवृक्षः। इति हेमचन्द्रः। ४।२२२ ॥ (यथा,—
"त्रिकण्टः स्थलशृङ्गाटो गोकण्टोऽथ त्रिकण्टकः ॥"
इति वैद्यकरत्नमालायाम् ॥)

त्रिका, स्त्री, (तिस्रोऽवयो यस्याः। "संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु च।" ५।१।५८। इति कन्। ततष्टाप्।) कूपोपरिस्थपट्टप्रान्तभागः। भूमिष्ठकूपपट्टम्। इत्यन्ये ॥ कूपस्य समीपे रज्जुधारणार्थं त्रिखिदारुयन्त्रम्। इति स्वामी ॥ इत्यमरटीकायां भरतः ॥

त्रिकायः, पुं, (त्रिकं आध्यात्मिकाधिभौतिकाधिदैविकदुःखत्रयं अयति गच्छत्यस्मादिति। अय गतौ+अपादाने घञ्। यद्वा, त्रिकं त्रिकालमयति वेत्तीति। अय+अच्।) बुद्धः। इति हेमचन्द्रः। २।१४८ ॥

त्रिकार्षिकं, क्ली, (कर्षाय हितम् कार्षिकम्। त्रयाणां कार्षिकाणां समाहारः।) मिलितनागरातिविषामुस्तात्रयरूपम्। इति राजनिर्घण्टः ॥

त्रिकालज्ञः, पुं, (त्रिकालं वर्त्तमानातीतभविष्यत्कालविवरणं जानातीति। ज्ञा+"आतोऽनुपसर्गे कः।" ३।२।३। इति कः।) बुद्धः। इति हेमचन्द्रः। २।१४६ ॥ सर्व्वज्ञे, त्रि ॥ (यथा, बृहत्संहितायाम्। १७।१।
"युद्धं यथा यदा वा भविष्यदादिश्यते त्रिकालज्ञैः ॥")

त्रिकालदर्शी, [न्] पुं, (त्रिकालं वर्त्तमानातीतभविष्यद्रूपं पश्यतीति। दृश+णिनिः।) ऋषिः। इति हलायुधः ॥ भूतभविष्यद्वर्त्तमानवेत्तरि, त्रि ॥ (यथा, बृहत्संहितायाम्। २१।४।
"प्रध्वंसिन्यपि काले त्रिकालदर्शी कलौ भवति ॥")

त्रिकालवित्, पुं, (त्रिकालं वेत्तीति। विद्+क्विप्।) बुद्धः। इति हलायुधः ॥ त्रिकालज्ञे, त्रि ॥

त्रिकूटं, क्ली, (त्रिकूटः पर्व्वतः उत्पत्तिस्थानत्वेनास्त्यस्येति अर्श आदित्वादच्।) सिन्धुलवणम्। सामुद्रलवणम्। इति रत्नमाला ॥

त्रिकूटः, पुं, (त्रीणि कूटानि शृङ्गाणि यस्य।) पर्व्वतविशेषः। यस्योपरि लङ्का। (यथा, रामायणे। ५।२।१।
"स सागरमनाधृष्यमतिक्रम्य महाबलः।
त्रिकूटस्य तटे लङ्कां स्थितः स्वस्थो ददर्श ह ॥")
तत्पर्य्यायः। त्रिककुत् २। इत्यमरः।२।३।२॥ सुवेलः ३ त्रिसुकूटः ४। इति हेमचन्द्रः ॥ त्रिशृङ्गः ५। चित्रकूटकः ६। इति शब्दरत्नावली ॥ (अयन्तु पीठस्थानानामन्यतमः। अत्र भगवती रुद्रसुन्दरीरूपेण विराजते। यथा, देवीभागवते। ७।३०।६६।
"नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी ॥")
क्षीरोदसमुद्रतीरस्थपर्व्वतः। यथा,—
"सर्व्वरत्नमयः श्रीमान् त्रिकूटो नाम पर्व्वतः।
सुतः पर्व्वतराजस्य सुमेरोर्भास्करद्युतेः ॥
क्षीरोदजलवीच्या यो धौतामलशिलातलः।
उत्थितः सागरं भित्त्वा देवर्षिगणसेवितः ॥
अप्सरोभिः परिवृतः श्रीमान् प्रस्रवणाकुलः।
गन्धर्व्वैः किन्नरैर्यक्षैः सिद्धचारणपन्नगैः ॥
विद्याधरैः सपत्नीकैः संयुतैस्तु तपस्विभिः।
मृगद्वीपिगजेन्द्रैश्च वृतगात्रो विराजते ॥
पुन्नागैः कर्णिकारैश्च विल्वामलकपाटलैः।
चूतनिम्बकदम्बैश्च चन्दनागुरुचम्पकैः ॥
शालैस्तालैस्तमालैश्च शरलार्ज्जुनपिप्पलैः।
तथान्यैर्विविधैर्वृक्षैः सर्व्वतः समलङ्कृतः ॥
नानाधात्वङ्कितैः शृङ्गैः प्रस्रवद्भिः समन्ततः।
शोभितो रुचिरप्रख्यैस्त्रिभिर्व्वर्णैश्च सानुभिः ॥
मृगैः शाखामृगैः सिंहैर्मातङ्गैश्च सदामदैः।
जीवञ्जीवकसंघुष्टैश्चकोरशिखिनादितैः ॥
तस्यैकं काञ्चनं शृङ्गं सेवते यद्दिवाकरः।
नानापुष्पसमायुक्तं नानागन्धाधिवासितम् ॥
द्वितीयं राजतं शृङ्गं सेवते यन्निशाकरः।
पाण्डराम्बुदसंकाशं तुषारचयसन्निभम् ॥
वज्रेन्द्रनीलवैदूर्य्यतेजोभिर्भासयन् दिशः।
तृतीयं ब्रह्मसदनं प्रकृष्टं शृङ्गमुत्तमम् ॥
न तत् कृतघ्नाः पश्यन्ति न नृशंसा न नास्तिकाः।
नातप्ततपसो लोके ये च पापकृतो जनाः ॥
तस्य सानुमतः पृष्ठे सरः काञ्चनपङ्कजम्।
कारण्डवसमाकीर्णं राजहंसोपशोभितम् ॥
गजो ह्यचलसंकाशो मदाचलितलोचनः।
तृषितः पातुकामोऽसाववतीर्णश्च तज्जलम् ॥
स लीनः पङ्कजवने यूथमध्यगतश्चरन्।
गृहीतस्तेन रौद्रेण ग्राहेणाव्यक्तमूर्त्तिना ॥
गरुडस्थो जगन्नाथो लोकाधारस्तपोधन !।
ग्राहग्रस्तं गजेन्द्रं तं तञ्च ग्राहं जलाशयात् ॥
उज्जहाराप्रमेयात्मा तरसा मधुसूदनः।
स्थलस्थं दारयामास ग्राहं चक्रेण माधवः ॥
मोचयामास नागेन्द्रं पाशेभ्यः शरणागतम् ॥"
इति वामनपुराणम् ॥
(घोटकविशेषः। यथा, नकुलकृताश्वचिकित्सिते। ४।६।
"त्रयो यस्य ललाटस्था आवर्त्ता अधरोत्तराः।
त्रिकूटः स परिज्ञेयो वाजिवृद्धिकरः परः ॥")

त्रिकूटलवणं, क्ली, (त्रिकूटं सामुद्रमिव लवणम्।) द्रोणीलवणम्। इति राजनिर्घण्टः ॥

त्रिकोणं, क्ली, (त्रयः कोणा यस्य।) योनिः। इति शब्दार्थकल्पतरुः ॥ (कामरूपपीठविशेषः। यथा, शब्दार्थचिन्तामणिधृतवचनम्।
"करतोयां समारभ्य यावद्दिक्करवासिनी।
शतयोजनविस्तारं त्रिकोणं सर्व्वसिद्धिदम् ॥")
लग्नात् नवपञ्चमलग्ने। इति दीपिका ॥ (त्रिभुजक्षेत्रभेदः। इति लीलावती ॥) त्र्यस्रे, त्रि। त्रिकोणवस्तूनि यथा। हलः १ शिवचक्षुः २ कामाख्या ३ वह्निमण्डलम् ४ एकारः ५ वज्रम् ६ शृङ्गाटम् ७ शकटादि ८ योनिः ९। इति कविकल्पलता ॥

त्रिकोणफलं, क्ली, (त्रिकोणं त्र्यस्रं फलं यस्य।) शृङ्गाटकम्। इति भावप्रकाशः ॥

त्रिक्षारं, क्ली, (त्रयाणां क्षाराणां समाहारः।) क्षारत्रयम्। मिलितसर्ज्जिकाक्षारयवक्षारटङ्कणक्षाराणि। इति राजनिर्घण्टः ॥ (यथा, वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे।
"सर्ज्जिका टङ्कणञ्चैव यवक्षार उदाहृतः ॥")

त्रिक्षुरः, पुं, (त्रीणि क्षुराणीवाग्राणि यस्य।) कोकिलाक्षवृक्षः। इति रत्नमाला ॥ कुलेखारा इति भाषा ॥

त्रिखं, क्ली, त्रपुषम्। इति शब्दचन्द्रिका ॥

त्रिखट्टं, क्ली, तिसृणां खट्टानां समाहारः। खट्टात्रयम्। इत्यमरः। ३।५।४१ ॥

त्रिखट्टी, स्त्री, (तिसृणां खट्टानां समाहारः। "द्विगोः।" ४।१।२१। इति ङीप्।) त्रिखट्टम्। इत्यमरः। ३।५।४१ ॥